प्रद्युम्नानन्दे रसपर्यालोचनम्

वेङ्कटाध्वरिः :-

अयं कविः काञ्चीपुरनिवासीति, काल । अष्टादशशताब्दः इति, अस्य काव्यानि च विश्वगुणादर्शचम्पूः, वरदाभ्युदयचम्पूः, उत्तरचम्पूः श्रीनिवासचम्पूः शृङ्गारदीपादिभाणग्रन्थाः सुभाषितकौस्तुभादिचाटुकाव्यानि, यादवराघवीयसंज्ञकं द्विसन्धानकाव्यम्, लक्ष्मीसहस्रस्तोत्रकाव्यम्, प्रद्युम्नानन्दीयनाटकादीनि आसन् इति साहित्यविमर्शनादिग्रन्थपर्यालोचनेन ज्ञायते ।

विश्वगुणादर्शचम्प्वाम् अयं स्वपरिचयम् इत्थं प्रस्तौति-

अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैव विद्वन्मणेः ।
पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते ।।

तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः ।
व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी ।।[1]

इति कथनेन ज्ञायते यत्- **वेङ्कटाध्वरी** अप्पय्यदीक्षितस्य पौत्रः इति, अस्य पिता च रघुनाथदीक्षितः श्लेषयमकचक्रवर्तिबिरुदेन भूषितः इति, एवं वेङ्कटाध्वरिरपि श्लेषयमकचक्रवर्तिबिरुदभूषित इति च ज्ञायते ।। अपि च -

वरदाभ्युदयचम्पूकाव्ये कविरसौ स्वस्य चतुश्शास्त्रपारावारपारीणतां रसालङ्कारसरणिमादृत्य विविधकाव्यनिर्माणधुरीणतां च स्वयमित्थं प्रकटयामास । यथा-

व्यायामं गमितात्वलङ्कृतिपथे व्यापारिता व्याकृतौ
तर्कारण्यगतागतैः श्रमवती तन्त्राङ्गणे नर्तिता ।
त्रय्यद्रेः अधिरोपिता च शिखरं तर्षादियं भारती
गम्भीरं गजभूधरेश्वरकथागङ्गाझरं गाहते ।।[2] इति ।

अनल्पकल्पनाभरिते काव्यपथे इव व्याकरणे **महाभाष्यस्फूर्तिम्,** तर्कशास्त्रे **मणिसारखण्डनम्,** मीमांसायां **विधित्रयपरित्राणम्,** विशिष्टाद्वैतवेदान्ते **नयद्युमणिदीपिकां** च विरचय्य स्वीयां चतुश्शास्त्रपारीणतां प्राचीकशत्। चम्पूग्रन्थाननेकान्, नाटकानि च त्रिचतुराणि लक्ष्मीसहस्र-श्रवणानन्दप्रभृतीनि च विविधानि स्तोत्राणि एतत्कर्तृकाणि पठताम् अस्य श्लेषयमकचक्रवर्तिबिरुदम् अन्वर्थमेवेति सहृदयानां चेतसि प्रतिभायात् । कल्पनाप्रवाहकरम्बितां विसृत्वरीं प्रतिभाम् अस्य साक्षात् अध्यक्षयद्भिः समकालिकैः पण्डितप्रवरैः अयमपि कविः सबहुमानम् उपश्लोकित इति कञ्चित् मुक्तकश्लोकं श्लेषचमत्कृतं रसिका उदाहरन्ति । यथा-

वेङ्कटाध्वरिणाऽनेन जितौ गुरुफणीश्वरौ ।
धिषणाहीनतां प्राप्तौ जग्मतुर्जीवशेषताम् ।।[3] इति ।

---

1. विश्वगुणादर्शचम्पूः श्लोकः २, ३
2. वरदाभ्युदयचम्पूः
3. विश्वगुणादर्शचम्पूः पृष्ठः ५

रूपकसाहित्यम् :-

श्रीमद्वेङ्टाध्वरिणो रूपकसाहित्ये ग्रन्थद्वयमेवाधुना लभ्यते । प्रद्युम्नानन्दनाटकम्, शृङ्गारदीपभाणः चेति । संस्कृत-प्राकृतपूर्वशब्दश्लेषयमककथाविशेषविचित्रितमिदं **प्रद्युम्नानन्दनाटकं** रतिप्रद्युम्नपरिणयं प्रतिपादयति। अत्र स्थिताः षडङ्काः एकैकं एकैकरसं पुष्णातीति नातिविचित्रम् । भाषा सरलाऽपि भावो रस ा हृद्यतामाप्नोति। प्रसिद्धकथाश्रितं नाटकमिदम् ।

नाटकसारः :-

पुरा किल घोरे तपसि वर्तमानश्शिवः निजतपो विघ्नप्रवृत्तं कामं फालनेत्राग्निना भस्मसात्कृत्य तद्विरहखिन्नायाः रतेस्तपसा तोषितस्सन् **'कृष्णावतारे रुक्मिणी-कृष्णाभ्यां जनितेन जन्मान्तरं प्राप्तेन तव प्रियेण समागमिष्यसि, शम्बरासुरभञ्जनाय अवतरिष्यता तेन सह, आसङ्गमप्राप्ति तद्राक्षसगृहे मायारूपेण पाकशालाधिकारं प्राप्य मदुपदिष्टमायाविद्यया निजपातिव्रत्यं रक्षन्ती वस'** - इत्यादि वरं तस्यै ददौ । एवं शिवस्य वचनान्यारभ्य शम्बरासुरवध-द्वारकाप्रवेशपर्यन्तां कथां नारदपर्वतमुन्योः सम्भाषणपुरस्सरं पुरःस्थापयति कविः । विषयविवेचनाय श्लेष-यमककथाविशेषविचित्रात् अस्मात् नाटकात् यमकादयो न स्वीकृताः ।

शृङ्गारः

रसिकजनमोदकः कविरयमत्र नाटके क्वचित्क्वचिदतिवेलं शृड्गाररसं परिपोषितवान् यत्र कथा शृड्गारव्यक्त्योः रतिमन्मथयोः जन्मान्तरविरहावस्थावर्णनप्रधाना ।

अ . अतिवेलशृडगारः :-

पूर्वजन्मस्मृतिहीनस्य प्रद्युम्नस्य मायावतीनिराकरणं विरहखिन्नायाः मन्दभाग्यायाः मायावत्या ा चन्दनादि शीतलद्रव्यनिन्दादिकं शृङ्गारचर्या(चेष्टाऽ)त्र नाटके निसर्गपेशला सुन्दरा च भवति ।

भृगुमद् गिरितटे वनसौभाग्यविलोकनाय विदूषकेण सह गतः प्रद्युम्नस्तत्रत्य विद्याधरदम्पत्योः शृङ्गारचेष्टाः पश्यति । तत्र कामुको विद्याधरोऽङ्कमधिरोप्य स्वीत्कृत्य दीर्घनितम्बगुर्व्याः प्रियायाः अधरामृतमास्वादयति ससुखम् । रत्यङ्गक्रीडाया : प्रत्यक्षवद्वर्णनं शृङ्गारस्य वेलातिलङ्घनं सूचयति ।

तद्यथा-

निश्शङ्कमङ्कमधिरोप्य नितम्बगुर्वीं
निवीविकर्षभयसंभ्रमचञ्चलाक्ष्मीम् ।
सीत्कृत्य दीर्घमिह शीधुमयं सुखेन
बिम्बाधरं चिरमसौ पिबति प्रियायाः ।।[4]

आ . उदात्तशृङ्गारः :-

मञ्जदुज्जीवनसरसि लब्धजन्मान्तररत्यधरसुखः प्रद्युम्नः स्वस्य तन्निराकरणं मोहजनितमिति प ाातप्तः स्वपूर्वरतिसुखमनुस्मरति यत्र प्रसूनधनुषस्तस्य रोमाञ्चकर्कशरतिस्तनशातकुम्भकुम्भोप-मर्दनसम्भ्रमाः पुनः पुनः स्मारिताः । तत्र स्थितं श्लोकत्रयम् उदात्तशृङ्गारमभिद्योतयति यत्र अणुमध्यमा पुनः पुनराश्लेषसुखं जनितश्रमालसा सुन्दरी रतिः पुनःपुनर्मधुरस्मृतिभिः चिन्तिता प्रद्युम्नेन । अपि च रत्याः विरहबाधासाहिष्णो ोदात्त-शृङ्गारोऽभिवर्णितोऽत्रैवाङ्के ।

4. प्रद्युम्नानन्दीयम् प्रथमाङ्कः श्लो. १४

रोमाञ्चकर्कशरतिस्तनशातकुम्भ-

कुम्भोपमर्दिपरिरम्भणसम्भ्रमाणि ।

तानि प्रसूनधनुषो मम ताण्डवानि

चेतस्स्वयं स्मरति हन्त! चिराय भूयः ।।[5]

(पुनर्निध्याय सविषादनिर्वेदम् । सविप्रतिसारं च ।) हा! हतोऽस्मि महतां प्रमादेन तथा हि-

अयत्नलब्धामणुमध्यमान्तां
त्यजन् भ्रमाद्दैवहतोऽस्मि मूर्खः ।
अनर्घमप्यन्तिकवर्ति रत्न-
मङ्गारमोहादिव मन्दभाग्यः ।।[6] (सानुस्मरणकौतुकम्)

हर्षेण स्तिमितं स्मरेण मसृणं ह्रीणं प्रतिक्षेपणे
प्रौढोन्मादजडं तत ा तरलं प ान्मिलच्चापलम् ।
प्रोदञ्चद्भयमूर्छितं पुनरपि स्तोकस्मितालिङ्गितम्
तन्वङ्ग्याः किमपि स्मरामि मधुरं तत्ताद्दगालोकितम् ।।[7] इति।

अस्ति चेदपि एकैकाङ्के एकरसः अस्य नाटकस्य अङ्गी तु **शृङ्गार** एव अन्ये च अङ्गरसाः भवन्ति। क्वचित् करुणरसः प्राधान्यं वहति। तद्यथा -

शम्बरः :- (सामर्षम्) अरे! रुक्मिणीयौवनपरवशो! पशुपालशिशो! प्रद्युम्नपशो!

शम्बरस्य ममाप्यन्तर्जृम्भितश्शोकपावकः ।
सुतापाय-समुत्पन्नेत्यसुतापाय ते भवेत् ।।[8]

अस्मिन् श्लोके युद्धे मृतान् पुत्रान् स्मारं स्मारमतिकरुणं विलपतश्शम्बरस्य रीतिः आन्त्राण्यपि कृन्ततीव भाति । स शम्बरो युद्धभूमौ स्वपुत्रघातिनं प्रद्युम्नं बहुवारं निन्दति । स रुक्मिणीयौवनपशुः अज्ञाननिजमध्यवर्तिपशुपालशिशुः, शिशुः इति च । तत्र निन्दावाक्ये गर्भशोकः कियान् दुर्भर इति प्रकटीक्रियते।

इत्थं च प्रद्युम्नानन्दीयनाटके शृङ्गारः अङ्गिरसः इति वीराद्यङ्गरसाः अङ्गिनः शृङ्गारस्य पोषकाः इति निश्चीयते ।।

5. प्रद्युम्नानन्दीयम् तृतीयाङ्कः श्लोकः १२
6. प्रद्युम्नानन्दीयम् तृतीयाङ्कः श्लो. ४२
7. प्रद्युम्नानन्दीयम् तृतीयाङ्कः श्लो. ४३
8. प्रद्युम्नानन्दीयम् चतुर्थाङ्कः श्लो. ५०

अनुशीलितग्रन्थाः (Reference Books)

१. **प्रद्युम्नानन्दनाटकम्** (श्रीमदरिशाणफालवेङ्कटाचार्यविरचितं संस्कृतप्राकृतापूर्वशब्दश्लेष-यमककथा-विशेषविचित्रितम्), तिरुमलताताचार्यसाह्येन संशोधितः, विद्यातरङ्गिणीमुद्रणशाला - महीशूरपुरी (मैसूर्) - १८८६..

२. **श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनाम् अध्ययनम्,** ग्रन्थकर्ता - डा. जि. स्वामिनाथाचार्युलु यम्.ए., पि.हेच्.डि. (सं.), जून् १९८८.

३. **विश्वगुणादर्शचम्पूः -** महाकविश्रीमद्वेङ्कटाध्वरिविरचिता, योगीत्युपाभिध-ब्बालकृष्णशास्त्रिविरचितपदार्थ-चन्द्रिकाटीकासहिता । ब्बाक्रे इत्युपाह्वगङ्गाधरभट्टसूनुना महादेवशर्मणा संशोधिता । मुम्ब्बय्यां तुकाराम जावजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये आयसाक्षरैर्मुद्रयित्वा प्रकाशिता । ख्रिस्ताब्दः -१९१५

४. **लक्ष्मीसहस्त्रम् -** वेङ्कटाध्वरिः, व्याख्या - रत्नप्रकाशिका व्याख्याकारः - श्रीकृष्णब्रह्मतन्त्रपरकालमुनीन्द्रः, परिष्कर्ता - श्री. न. च. रघुनाथाचार्यः, प्रकाशकः - सत्सम्प्रदायपरिरक्षणसभा, वरंगल् (आं.प्र.) - २०००.

५. **संस्कृतसाहित्येतिहासः -** आचार्य लोकमणिदाहलः, कृष्णदास अकादमी, वाराणसी - १९९९.

६. **साहित्यचरित्रमु -** मुदिगण्टि गोपालरेड्डी, सुजातारेड्डी च । प्रकाशकः - श्रीपोट्टिश्रीरामुलुतेलुगुविश्वविद्यालयः हैदराब्बाद् - २००२.